## सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्। (६१/२९७५)

सुपि [1]इत्यनुवर्तते। कर्मग्रहणं [2]तु 'स्पृशोऽनुदके क्विन्' (३.२.५८/४३२) इत्यतः प्रभृति न व्याप्रियते। सदादिभ्यः धातुभ्यः सुबन्ते उपपदे उपसर्गेऽपि अनुपसर्गेऽपि क्विप् प्रत्ययो भवति। उपसर्गग्रहणं ज्ञापनार्थम्, अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवति इति, 'वदः सुपि क्यप् च' (३.१.१०६/२८५४) इति। सू इति द्विषा (धा. पा. १०१४) साहचर्यात् सूतेः (धा.पा.१०३२) आदादिकस्य ग्रहणं, न सुवतेः (धा. पा. १४०९) [3]तौदादिकस्य। 'युजिर् योगे' (धा. पा. १४४५), 'युज समाधौ' (धा. पा. ११७८), द्वयोरपि ग्रहणम्। 'विद ज्ञाने' (धा. पा. १०६५), 'विद सत्तायाम्' (धा. पा. ११७२), 'विद विचारणे' (धा. पा. १४५१), [4]त्रयाणामपि ग्रहणम्। न लाभार्थस्य विदेः (धा. पा. १४३३), अकारस्य [5]विवक्षितत्वात्। सद् – 'शुचिषत्' (ऋ. ४.४०.५)। 'अन्तरिक्षसत्' (ऋ. ४.४०.५)। '[6]उपसत्' (तै.सं. ६.२.३.२)। सू—[7]अण्डसूः। शतसूः। प्रसूः (तै.४.७.३.२)। द्विष – मित्रद्विट्। प्रद्विट्। द्रुह – मित्रध्रुक् (मै.सं.४.३.४)। [8]प्रध्रुक्। दुह – गोधुक्। प्रधुक्। युज – [9]अश्वयुक्। प्रयुक्। विद – वेदवित्। [10]प्रवित्। [11]ब्रह्मवित्। भिद – काष्ठभित्। [12]प्रभित्। छिद – रज्जुच्छिद्। प्रच्छिद्। जि – शत्रुजित्। [13]प्रजित्। नी – सेनानीः। [14]प्रणीः। ग्रामणीः। [15]अग्रणीः। कथमत्र णत्वम्? 'स एषां ग्रामणीः' (५.२.७८/१८७८) इति [16]निपातनात्, नयतेः 'पूर्वपदात् सञ्ज्ञायामगः' (८.४.३/८५७) इति णत्वम्[17]। राज – राट्। [18]विराट्। सम्राट्। 'मो राजि समः क्वौ' (८.२.३५/१२६) इति मत्वम्। 'अन्येभ्योऽपि[19] दृश्यते' (३.२.१७८/३१५८), 'क्विप् च' (३.२.७६/२९८३) इति सामान्येन वक्ष्यति, तस्यैवायं प्रपञ्चः॥

## भजो ण्विः। (६२/२९७६)

उपसर्गे सुपि इति वर्तते। भजेर्धातोः [20]सुबन्त उपपदे उपसर्गेऽपि [21]अनुपसर्गेऽपि ण्विप्रत्ययो भवति। अर्धं भजते अर्धभाक्[22]। उपसर्गेऽपि – [23]प्रभाक्[24]॥

## छन्दसि सहः। (६३/३४०९)

उपसर्गे सुपि [25]इत्येव। छन्दसि विषये सहेर्धातोः [26]सुबन्ते उपपदे ण्विप्रत्ययो भवति। '[27]तुराषाट्' (ऋ. ३.४८.४)। 'सहेः साडः सः' (८.३.५६/३३५) इति षत्वम्, 'अन्येषामपि दृश्यते' (६.३.१३७/३५३९) इति दीर्घत्वम्[28]॥

---

1. इति वर्तते ब. फ. 2. तु नास्ति फ. 3. तुदादिकस्य क. 4. इति इत्यधिकम् क. 5. लोपस्य इत्यधिकम् क. फ. 6. संसद् ब. फ. 7. अण्डसूः शतसूः नास्ति फ, प्रसूः नास्ति क. 8. प्रध्रुक् नास्ति फ. 9. क्षिप्रयुक् इत्यधिकम् क. 10. संवित् क. नास्ति ब. 11. निविद् ब. क, नास्ति ड. 12. प्रभिद् ग, नास्ति फ. 13. प्रजित् नास्ति ब. फ. 14. प्रणीः नास्ति फ. 15. अग्रणीः नास्ति फ. 16. ज्ञापकात् अ. क. ड. 17. पूर्वपदात् असंज्ञायामपि णत्वं भवति इत्यधिकम् ड. 18. स्वराट् अ. ड. 19. क्विबन्तेभ्यो इत्यधिकम् ग. 20. सुबन्ते प्रादौ क. 21. अनुपसर्गेऽपि नास्ति अ. फ. 22. पादभाक् इत्यधिकम् अ. ब. फ, पदभाक् इत्यधिकम् क. 23. प्रभजते इति इत्यधिकम् अ. क. फ. 24. तुर्वभाक् इत्यधिकम् अ. क. 25. इति वर्तते फ. 26. सुबन्ते नास्ति फ. 27. जलाषाट् अ. फ. न्या. ग, पृतनाषाट् क. 28. छन्दसि इति किम्? जलाषाहः इत्यधिकम् ड.